पक्षिणः पशवः च

मयूरः

पिच्छसहितस्य मयूरस्य दर्शनम् अद्भुतकरम्। नीलहरितादिवर्णैः विराजमानं मयूरस्य पिच्छं द्रष्टॄन् आकर्षति। किन्तु मयूरस्य कण्ठध्वनिः तु श्रवणकठोरः।


प्राचीनकालात् आरभ्य भारते किं, ग्रीक् चीन इत्यादिषु देशेषु अपि मयूरपिच्छं अलङ्कारार्थम् उपयुज्यते। ग्रीक्जनानां भावना अस्ति यत् आर्गान् राजकुमार्याः रक्षणार्थं हीरादेवता सहस्रनेत्र-युतेन पिच्छेन अलङ्कृतं मयूरं नियोजितवती इति। अतः ते मयूरं हीरापक्षी इति नाम्ना आह्वयन्ति स्म। चीनदेशीयः राजा अधिकारिणां सत्कारार्थं मयूरपिच्छैः निर्मितं व्यजनं पुरस्कार-रूपेण ददाति स्म।

सुवर्णेन अपूर्वमणिभिः च अलङ्कृतं मोगलकालीनं मयूरसिंहासनं जगद्विख्यातम् अस्ति।

युरोपदेशेषु बहुकालतः आरभ्य उद्यानशोभार्थं मयूरं रक्षयन्तः सन्ति। तथापि मयूरस्य मूल-स्थानं भारतं श्रीलङ्का च।

भूम्यां, भूमिं स्पृशत्सु वृक्षस्य शाखासु वा मयूरः स्वनीडम् आरचयति। मयूरी एकवारं षट् अण्डानि प्रसूते। आरम्भवर्षद्वये मयूरमयूर्योः मध्ये कोऽपि भेदः न दृश्यते। अनन्तरकाले शरीरे पिच्छम् उत्पद्यते। शाखासु उपविश्य पिच्छं विस्तारयतः मयूरस्य अपेक्षया इतस्ततः उड्डयतः मयूरस्य शोभा अधिका।

मयूरः अस्माकं राष्ट्रियः पक्षी।



पक्षिणः पशवः च –

आफ्रिकादेशीयाः गजाः

२१८ तमे वत्सरे आफ्रिकादेशस्य हानिबाल्नामकः सेनापतिः रोमजनानाम् उपरि आक्रमणं कृतवान् । तत्सन्दर्भे हानिबाल्पक्षतः गजाः अपि युद्धे भागं गृहीतवन्तः। तदा आल्पस्-इटलीमार्गे केचन गजाः मरणं गताः । एतस्मिन् युद्धे ये गजाः भागं गृहीतवन्तः तेषु अधिकाः आफ्रिकादेशीयाः । अन्ये भारतदेशीयाः ।

पूर्वं बहुषु देशेषु गजाः आसन् इति श्रूयते । किन्तु इदानीं केवलं भारते आफ्रिका देशे च गजाः दृश्यन्ते ।

आफ्रिकादेशस्य गजाः भारतगजानाम् अपेक्षया स्थूलाः उन्नताः च । तेषां कर्णाः अतिविशालाः । एते कर्णाः शरीरस्य शीतलतासम्पादने उपकुर्वन्ति । कदाचित् व्यजनम् इव आचरन्ति च । भारते तु गजाः घनारण्ये निवसन्ति इति कारणतः तादृशविशालकर्णानाम् अपेक्षा न भवति ।

आफ्रिकागजानां कुम्भस्थलं भारतीयगजस्य कुम्भस्थलापेक्षया उन्नतम् । तेषां शुण्डाः अधिकं वलयिताः । शुण्डायाः अन्ते नासापुटद्वयं भवति च । दन्ताश्च दीर्घाः भवन्ति ।

करिण्यः पुत्रैः सह पारिवारिकजीवनं यापयन्ति । एतादृशाः परिवाराः एकत्रीभूय तिष्ठन्ति । आवश्यकता अस्ति चेत् कदाचित् गजः स्वयूथं प्रविशति ।किन्तु सामान्यतः सः एकाकी एव विहरति ।

करिण्याः प्रसूतिसमये अन्या वृद्धा करिणी तया सह तिष्ठति । विशेषसाहाय्यम् अचरति च ।

आफ्रिकागजाः ५० वर्षाणि, भारतीयगजाः सामान्यतः ७० वर्षाणि यावत् च जीवन्ति ।



आफ्रिकादेशीयाः हरिणाः

आफ्रिकादेशीयाः हरिणाः इतरहरिणापेक्षया उन्नताः स्थूलाः च। आफ्रिकादेशे स्पर्धार्थम् अश्वान् इव एतान् हरिणान् गृहेषु इतरैः पोष्यप्राणिभिः सह पालयन्ति।

उन्नतः आकारः, वक्राकारं तीक्ष्णं शृङ्गम्, शरीरे विशिष्य कण्ठदेशे केशाः, सास्ना, वृषभस्य इव पुच्छम्- एतैः सहिताः एते हरिणाः तृणपर्णानि खादन्तः जीवन्ति। वयोनुगुणं एतेषां शरीरवर्णे अपि परिवर्तनं दृश्यते। सामन्यतः एतेषां वर्णः नीलमिश्रितः धूसरः।


आफ्रिकामरुभूमौ पर्वतप्रदेशेषु च एते दृश्यन्ते चेदपि विशेषतः सङ्ख्याधिक्यं तु हरिततृणैः व्याप्ते समतलप्रदेशे एव।

आदिनम् एते अरण्येषु तिष्ठन्ति। रात्रौ उषःकालतः पूर्वं च समतलप्रदेशम् आगत्य जलं पीत्वा प्रतिगच्छन्ति। समूहरूपेण निवसताम् एतेषां गणे शतपर्यन्तम् अपि सङ्ख्या दृश्यते। कदाचित् पुञ्जातीयाः हरिणाः एकाकिनः सन्तः लघुगणरूपेण सञ्चरन्ति।

शरीरभारकारणतः इतरप्राणिनाम् अपेक्षया एतेषु आलस्यम् अधिकं दृश्यते। तथापि समये प्राप्ते आकाशे गच्छन्तः इव वायुवेगेन गच्छन्ति। आफ्रिकादेशस्य घनारण्येषु समूहरूपेण जात्यश्वाः इव धावन्तः तरुगुल्मादीन् अतिक्रामन्तः नदीतटाकान् उत्तरन्तः यत् सञ्चरन्ति तत् नयनमनोहरं वर्णनातीतं च।

सामान्यतः एते हरिणाः भीरवः। तथापि विपत्काले स्वसन्तानरक्षणसन्दर्भे च शृङ्गम् एव आयुधत्वेन उपयुज्य शत्रून् समर्थतया सम्मुखीकुर्वन्ति। हरिणानां प्रसूतिः वर्षद्वये एकवारम्।

अतः सङ्ख्यावृद्धिः मन्दगत्या भवति। स च कश्चन कालः आसीत्- यत्र आफ्रिकादेशस्य दक्षिण-पूर्वभागे एतज्जातीयाः हरिणाः यथेष्टं दृश्यन्ते स्म। किन्तु इदानीम् तज्जातीयानां सङ्ख्या दिने दिने क्षीयमाणा अस्ति।



पक्षिणः पशवः च –

चतुष्पादिनः मीनाः

१७४१तमे वत्सरे रशियादेशस्य सेण्ट् पीटर् नामिका नौका बेरिङ्गद्वीपस्य तीरे भग्ना। तदा केचन प्राणान् रक्षन्तः तीरं प्राप्तवन्तः। तरणसमये तैः 'सी अटर्स्' नामकाः जलचराः सहस्र-सङ्ख्यया दृष्टाः। यावत् ते तस्मिन् द्वीपे स्थिताः तावत् आहारार्थं तेषां जलचराणां मारणं कृत-वन्तः। तेषां चर्माणि विक्रीय यथेष्टं धनं सम्पादितवन्तः च। ततः आरभ्य एतेषाम् आटर्स्-मीनानां मारणं दिने दिने प्रवृद्धम्। प्रशान्तसागरे ये बहुसङ्ख्यया दृश्यन्ते स्म ते कालान्तरे अदृश्यतां गताः। १९१०तमे वत्सरे अमेरिकादेशे १९१५तमे वत्सरे केषुचित् अन्यदेशेषु च एतेषां जलचराणां जातेः रक्षणार्थं मारणप्रतिबन्धकनियमः व्यवहारे आनीतः।

यस्मिन् समुद्रप्रदेशे शैवालाः पर्याप्तमात्रेण भवन्ति, यत्र च गभीरता न भवति तत्र ते समूह-रूपेण निवसन्ति। एतेषां सी अटर्स् मीनानां दैर्घ्यं एकमीरात्मकम्। पुच्छस्य दैर्घ्यं च पादोन-मीटरात्मकम्। महाशिरस्कानां ह्रस्वकण्ठानां लघुकर्णानां लघुनेत्राणां च एतेषाम् अग्रिमपादौ पृष्ठपादा-पेक्षया ह्रस्वौ। मुखे श्मश्रुरोमाणि सान्द्रं भवन्ति। अङ्गुलीनां मध्ये चर्मपटलं भवति।

एते मीनाः समुद्रप्रवाहात् आत्मानं रक्षन्तः शैवालानां मध्ये आत्मानं निगूह्य अधोमुखतया उन्मुखतया च जले तरणं कुर्वन्ति। एवमेव एते समूहरूपेण निद्रां कुर्वन्ति। निद्रासमये तेषु एकः रक्षणार्थं जागरितः तिष्ठति। निद्रातः उत्थाय समुद्रतलं गत्वा कर्कटकान् लघुमीनान् च खादन्ति। शुक्तिमध्ये स्थितान् मीनान् खादितुम् इच्छन्तः एते समुद्रतलतः शिलाः आनीय अग्रिमपादेन गृहीत्वा अन्यपादद्वयसाहाय्येन शिलया शुक्तिं घट्टयित्वा अन्तस्थान् मीनान् खादन्ति।

वर्षद्वये एकवारं एते सन्तानोत्पत्त्यर्थं भूमिम् आगच्छन्ति। एते प्राणिनः सहजीवनं शान्तिं च विशेषतया इच्छन्ति। केषुचित् विषयेषु एते मीनाः मनुष्यैः समाः सन्ति।



पक्षिणः पशवः च –

आयुःप्रमाणम्


अष्टादशशतके साहसी नाविकः इति ख्यातः केप्टन् जेम्स् कुक् १७७३तमे वत्सरे दक्षिण प्रशान्त-महासागरस्य द्वीपं बोङ्गां सन्दृष्टवान्। मैत्रीप्रतीकरूपेण सः तद्द्वीपस्य महाराजाय एकं कूर्मम् उपायनरूपेण दत्तवान्। तद्द्वीपजनाः द्वुई हेल्ला इति नाम्ना तं कूर्मम् आहूतवन्तः। सः कूर्मः १९६६तमे वत्सरे मृतः। तदीयम् आयुः २००वर्षात्मकम् आसीत्।

मानवस्य आयुः-प्रमाणं ११० वर्षाणि चेदपि सामान्यम् आयुः तु ७० वर्षाणि। मनुष्यः इव पशवः अपि केचन चिरं जीवन्ति। केचन कूर्माः कदाचित् १५२ वर्षपर्यन्तं जीवन्ति इत्येतत् साधारं प्रमाणीकृतम् अस्ति।

पशूनाम् अपेक्षया पक्षिणाम् आयुः अल्पम्। तथापि आस्ट्रेलियादेशे केचन शुकाः ५६ वर्षपर्यंतं, ७६ वर्षपर्यंतं च जीवितवन्तः इति श्रूयते। उलूकाः ६२ वर्षाणि यावत् जीवन्ति। सालव-जातीयः गृध्रः ७२ वर्षाणि, समुद्रकाकः ३६ वर्षाणि, चातकपक्षी १६-२१ वर्षाणि च जीवन्ति। विल्लोवार ब्लर् नामकः गायकः पक्षी ५ वर्षाणि जीवति। केचन मीनाः १५० वर्षाणि यावत् जीवन्ति।

पूर्वोक्तानाम् अपेक्षया सस्तनिपशू-नाम् आयुः न अधिकम्। अश्वाः ६२ वर्षाणि तिमिङ्गिलाः गजाः च ५० वर्षाणि, यावत् जीवन्ति। अपवादरूपेण केचन गजाः ८० वर्षाणि जीविताः इति श्रूयते।





पक्षिणः पशवः च –

विनाशपथम् अनुसरन्तः...!

प्रकृत्या बहुप्रकाराः प्राणिनः सृष्टाः । यदि वयम् एतेषां रक्षणविषये सगम्भीरं न चिन्तयेम तर्हि एते कालान्तरे विनष्टाः भवेयुः ।

गतशतकस्य मध्यभागे अमेरिकादेशे सर्वेषु भोजनकूटेषु आकर्षणकेन्द्रम् आसीत् 'प्यासेञ्जर पीजियन्' नामकस्य कपोतस्य पाकः । एते कपोताः वृक्षशाखासु निर्मितेषु नीडेषु समूहरूपेण निवसन्ति स्म । मिचिगोन् पेन्सिल्वेनिया इत्यादिषु प्रदेशेषु एकवर्षाभ्यन्तरे सार्धैककोटिकपोताः आहारार्थं मारिताः । १८८८तमे वत्सरे एतेषां कपोतानां वंशः एव नष्टप्रायः । १९१४तमे वत्सरे सिन्सिनारी प्राणिसङ्ग्रहालये एतज्जातीयः अन्तिमः कपोतः अपि मरणं गतः ।

एवमेव बहवः अपूर्वाः पक्षिणः पशवः च मानवेन नाशिताः । उपलब्धानाम् आधाराणाम् अनुगुणं एतावति काले १०० पशुजातयः १६० पक्षिजातयः च नाशिताः । इदानीं १००० प्राणिजातयः, २०,००० सस्यजातयः च विनाशपथे सन्ति । एवं विनाशपथे विद्यमानासु जातिषु तिमिङ्गिलाः उल्लेखनीयाः ।

पूर्वं क्तावादेशे दक्षिण-अमेरिकादेशे च विशिष्टशिखिनः दार्वाघाटाः प्रसिद्धाः आसन् । येषु वृक्षेषु ते निवसन्ति स्म तेषां वृक्षाणां जातिः एव उन्मूलिता । अतः एते दार्वाघाटाः अपि इदानीं न दृश्यन्ते । बोर्नियोदेशे ओरङ्गुटाङ्ग् नामकाः पुच्छरहिताः वानराः, दक्षिण-अमेरिका देशे जागूवारनामकाः तरक्षवः च पूर्वोक्तायाम् अवस्थायां सन्ति ।

अरेबियन् ओरिक्स् नामकानां प्राणिनां संरक्षणार्थम् अरिजोना प्रदेशे पोनिक्स प्राणिसङ्ग्रहालये निवासव्यवस्था उपकल्पिता अस्ति । विनाशमार्गे स्थितानां हवानीनी जातीयानां बकानां संरक्षणार्थं सर पीटर् स्काटमहोदयः स्लिम् विज् समीपे व्यवस्थां कृतवान् ।



पक्षिणः पशवः च –

गृध्राः

दूरदर्शकेन वयं यथा दूरस्थानि वस्तूनि अपि स्पष्टं पश्यामः तथैव गृध्रः अपि आकाशे सञ्चरन् एव भूमौ स्थितानि सूक्ष्माणि अपि वस्तूनि स्पष्टं पश्यति।

गृध्राणां नेत्राणि दूरदर्शकानि इव आचरन्ति। एतादृशं वैशिष्ट्यं मानवस्य अन्यपक्षिणः वा नास्ति एव।

समीपस्थान् द्रष्टुं गृध्रस्य नेत्रस्य कश्चन भागः उपकरोति। अपरः भागः दूरस्थान द्रष्टुं साहाय्यं करोति। एतेन गृध्रस्य आहारान्वेषणम् अतीव सुलभम्।

मांसाहारिणः एते गृध्राः आकारेण महान्तः। एकमीटर्दीर्घाः अपि भवन्ति कदाचित्। समर्थेन पक्षेण आकाशे निरायासं सञ्चरन्ति एते। सुदृढयोः पादयोः अन्ते अङ्गुलित्रयम् अग्रे, एका अङ्गुलिः पृष्ठतः च प्रसृताः तिष्ठन्ति। चञ्चुः दीर्घा, अग्रभागे वक्रा च। एतेन सुदृढं चर्म अपि एतैः विनायासं विदारयितुं शक्यते।

यद्यपि गृध्राः मांसाहारिणः, तथापि एते जीवतः प्राणिनः पक्षिणः न मारयन्ति। मृतानां मांसः एतेषां आहारः।

एषिया-आफ्रिका खण्डयोः ऐरोप्यखण्डस्य उष्णप्रान्ते च एते अधिकं दृश्यन्ते। मृतं जीविनं दूरतः एव ज्ञात्वा समूहरूपेण आगत्य तस्य जीविनः मासं सन्तोषेण खादन्ति। आहारः न लब्धः चेत् उपवासार्थम् अपि सिद्धा एव एते। यदा आहारः लभ्यते तदा आवश्यकतायाः अपेक्षया अधिकम् एव खादन्ति। मृतानां मांसम् एते खादन्तीत्यतः वातावरण-शुद्धौ एतेषां महत्त्वपूर्णं पात्रम्।

गृध्रेषु विविधाः जातयः सन्ति। भारते तु कृष्णवर्णीयाः गृध्राः एव दृश्यन्ते।



पक्षिणः पशवः च -

नार्वेदेशीयाः लेमिङ्ग्प्राणिनः

वर्षत्रये एकवारं मूषिकजातीयाः नार्वेदेशीयाः लेमिङ्ग्प्राणिनः विचित्ररीत्या व्यवहरन्ति। स्ववासस्थानतः पर्वततः प्रस्थाय समूहरूपेण समुद्रं प्रति गच्छन्तः एते जले प्रविश्य प्राणान् त्यजन्ति। एते किमर्थम् एवं कुर्वन्ति इति न ज्ञायते। प्रकृतेः वैचित्र्यम् एतत्।

सामान्यतः एकः लेमिङ्ग् वर्षे दश पुत्रान् प्रसूते। एतेन एतेषां सङ्ख्या तावत् वर्धते यत् आहारः सर्वथा अपर्याप्तः भवति। एवम् आहारस्य अभावेन पीडिताः एते आहारम् अन्विष्यन्तः 'समुद्रस्य अपरतीरे आहारः भवेत्' इति आशया समुद्रं प्रविश्य जले मज्जिताः भवन्ति इति केचन स्वाभिप्रायं प्रकटयन्ति।

नार्वेदेशे पर्वतश्रेणयः समुद्रस्य समीपे एव भवन्ति। लेमिङ्ग्प्राणिनः प्रयाणसन्दर्भे दिने आहारम् अन्विष्यन्तः, निद्रां कुर्वन्तः च रात्रौ समुद्रम् उद्दिश्य गच्छन्ति। मार्गे यावन्तः विघ्नाः आपतन्तु नाम, ते तान् अविगणय्य, समूहरूपेण सर्वे सम्मुखीकुर्वन्तः अग्रे गच्छन्ति। मार्गे पक्षिणः प्राणिनः च सुलभतया एतान् गृहीत्वा खादन्ति। अवशिष्टाः लेमिङ्ग्प्राणिनः समूहरूपेण अग्रे गच्छन्ति।

वर्तुलाकारं शिरः, वामनाः पादाः, ह्रस्वं पुच्छम् इति एतत् एतेषां स्वरूपम्। उत्तर-ऐरोप्यदेशेषु, एशीया- अमेरिकाखण्डेषु च एते सन्ति, तथापि नार्वेदेशे अत्यधिकसङ्ख्यया सन्ति। हरिततृणानि, किसलयाः, कोमलपत्राणि, वृक्षत्वचः च एतेषाम् आहाराः। गृध्राः, शृगालाः, उलूकाः वृकाः च एतान् विशेषतया खादन्ति। अतः एतेषां कुलं दिने दिने क्षीयमाणम् अस्ति।

ग्रीष्मकाले एते प्राणिनः बिलेषु निवसन्ति। शैत्यकाले तु पर्याप्तमात्रेण आहारं सङ्गृह्य हिमखण्डानाम् अधः वासं कुर्वन्ति। एतेषु एकविधानां प्राणिनां पादेषु शैत्यकाले दीर्घाः नखाः उत्पद्यन्ते। तैः नखैः ते बिलनिर्माणं कुर्वन्ति।



पक्षिणः पशवः च –

आर्कटिकप्रदेशीयाः 'सील्'जलचराः

आर्काटिकसमुद्रप्रदेशे हिमखण्डानाम् उपरि यदा सील्जलचराणां शावकाः मन्दं सरन्ति तदा पीतवर्णेन प्रकाशमानानां तेषां चर्मणः उपरि पतिताः सूर्यकिरणाः अपि पीतायन्ते। मुग्धमुखाः दीर्घनेत्राः एते सील्शावकाः मनोहारिणः भवन्ति।

मार्च-एप्रिल् मासयोः मध्ये उत्पद्यन्तः एते एकसप्ताहात् अधिकं न जीवन्ति। यतः जन्मानन्तरम् एकसप्ताहानन्तरे पीतं तेषां चर्म नीलवर्णतां प्राप्नोति। एवंवर्णपरिवर्तनतः पूर्वम् एव जनाः तान् मारयन्ति, तेषां चर्म सङ्गृह्णन्ति च। एवं प्रतिवर्षं सहस्रशः सील्जलचराः मरणं प्राप्नुवन्ति। तेषां कोमलानि चर्माणि धनिकस्त्रीणां प्रावारकनिर्माणे उपयुज्यन्ते।

अस्य शतकस्य आरम्भे एतेषां सङ्ख्या विंशति मिलियन् आसीत्। इदानीं तु केवलम् एकमिलियन् अवशिष्टम्। "एवम् एव मारणहोम प्रचलति चेत् आगामिदशवर्षेषु एतेषां सन्ततिः एव निर्मूलिता भविष्यति" इति वदन्ति-'न्यूफौण्डलेण्ड' देशस्य 'ग्रीन्पीस्' संस्थायाः जनाः। एषा संस्था सील्शावकानां मारणम् निरोद्धुं प्रयत्नरता अस्ति।

एतेषु गज-सील् जातीयानां केषाञ्चित् भारः ४ टन्। उन्नतिः च ६ मीटर्। एते जलचराः जले स्थितान् मीनान् जलसर्पान् च खादन्तः जीवन्ति। एतेषां कर्णाः स्पष्टतया न दृश्यन्ते चेदपि श्रवणशक्तिः तु असाधारणी।

एते जलचराः जलस्य उपरि आगत्य श्वासकोषपूर्णं वायुं स्वीकृत्य जले मज्जन्ति। जले तु एतेषां हृदयं मन्दं स्पन्दते। अतः ते बहुकालं यावत् जले स्थातुं शक्नुवन्ति। जले तु एते सञ्चरन्ति तथा चेदपि भूमेः उपरि अलसानाम् इव मन्दा गतिः तेषाम्।



राकून् प्राणिनः

उत्तर-अमेरिकाप्रदेशे निवसतां राकून् प्राणिनाम् आहारान्वेषणपद्धतिः विचित्रा। भल्लूक-जातीयाः एते राकून् प्राणिनः सायङ्काले अन्धकारस्य प्रसारस्य आरम्भः यदा भवति तदा आहारान्वेषणार्थं निर्गच्छन्ति। लघुपक्षिणः, तेषाम् अण्डानि, मूषकान् मण्डूकान् च गृहीत्वा खादन्ति। अरण्ये आहारः यदि न लभ्येत तर्हि समीपस्थानां ग्रामाणां कुक्कुटवसतेः उपरि आक्रमणं कुर्वन्ति। तत्सन्दर्भे अल्पः शब्दः उत्पन्नः चेदपि भीत्या वृक्षशाखासु निलीनाः भवन्ति।

एतेषां प्राणिनां पादाः अल्पाकारकाः। अङ्गुलीनां मध्ये चर्मपटलं नास्ति। तथापि एते अतिवेगेन तरणं कर्तुं समर्थाः। नदीजले निमज्जनं कृत्वा अग्रिमपाददयेन मीनान् गृहीत्वा उपरि आगच्छन्ति। सर्वविधान् आहारान्–मीनान् अपि–जलेन प्रक्षाल्य एव खादन्ति इत्येतत् एतेषां वैशिष्ट्यम्।

पुच्छसहितम् एतेषां दैर्घ्यम् एकमीटरात्मकम्। पूर्वम् एतेषां सङ्ख्या पर्याप्तमात्रेण आसीत्। एषु दिनेषु ऊर्णवस्त्राणां निर्माणे एतेषां प्राणिनां चर्म विशेषतया उपयुक्तम् इति कारणतः सङ्ख्या गणनीयप्रमाणेन क्षीणा जाता। गतशतक-पर्यन्तम् अपि वनवासिनः विनिमयसाधनरूपेण एतेषां राकून् प्राणिनां चर्मणाम् एव उपयोगं कुर्वन्ति स्म, न तु धनस्य।

सामान्यतः एते प्राणिनः वृक्षस्य शाखासु निवसन्ति। तथापि कदाचित् भूमौ इतरप्राणिभिः निर्मितेषु बिलेषु निवसन्ति। शैत्यकाले एते प्राणिनः समीचीनं स्थलम् अन्विष्य गाढं निद्रां कुर्वन्ति। शैत्यकालस्य अन्ते यदा वातावरणे क्रमशः उष्णता वर्धते तदा जागरूकाः सन्तः बाह्यप्रपञ्चं प्रविशन्ति।



पक्षिणः पशवः च –

उड्डयनसमर्थाः चिक्रोडाः

परिस्थितेः अनुगुणं ये आत्मानं परिवर्तयितुं शक्नुवन्ति तादृशानां प्राणिनां सन्ततिः एव चिरकालं जीविष्यति। अन्यथा कालान्तरे तेषां सन्ततिः नश्यति। परिसरानुगुणं परिवर्तनशीलता पक्षिणां पशूनां च सहजः स्वभावः इत्यत्र उड्डयनसमर्थाः चिक्रोडाः एव प्रमाणम्। युरोपखण्डे, अमेरिकाखण्डे, उत्तर-अमेरिकायां च तत्र तत्र दृश्यमानानाम् एतेषां चिक्रोडानां ३२ प्रकाराः सन्ति।

एते चिक्रोडाः उन्नतासु वृक्षशाखासु निवसन्ति। आहारार्थम् आक्रमणं कुर्वद्भ्यः पक्षिभ्यः आत्मानं रक्षितुम्, अधः पतितानि बीजानि फलानि उन्नेतुं च एते पक्षाकारकान् पादान् प्रसार्य उड्डयनं कुर्वन्ति। अग्रिमपादयोः, पृष्ठतः स्थितयोः पादयोः च मध्ये रोमपूर्णं चर्मपटलम् अस्ति। तच्च पटलं उड्डयनसमये पक्षः इव आचरति।

एते चिक्रोडाः उड्डयनतः पूर्वं शिरः उन्नीय इतस्ततः दृष्ट्वा गन्तव्यं स्थानं कियद्दूरे स्यात् इति सम्यक् परिशील्य अग्रे गच्छन्ति। भूमिप्राप्तितः पूर्वं पुच्छम् उन्नयन्ति। पादयोः मध्ये चर्मपटलम् अस्तीत्यतः इतरचिक्रोडानाम् अपेक्षया अधिकं निरातङ्कं जीवन्ति। एतेषाम् उड्डयनम् अपि निरातङ्कम् एव। प्रतिघण्टं ६.५ कि.मी. वेगेन गच्छन्ति।

एते दिने वृक्षशाखासु निलीय तिष्ठन्ति। रात्रौ आहारान्वेषणार्थं निर्गच्छन्ति। यस्मिन् वृक्षे एतेषां वासः तस्यैव वृक्षस्य वर्णः एतेषां चर्मणः अपि।

फिलिप्पैन्देशे मलेषियादेशे च एतज्जातीयं प्रकारद्वयं परिदृश्यते। तेषां चिक्रोडानां आकारः मार्जारस्य इव। तीक्ष्णाः नखाः, अल्पाकारकाः चेदपि दृढाः दन्ताः च एतेषां वैशिष्ट्यम्।

आष्ट्रेलियादेशे निवसन्तः एतत्प्रकारकाः चिक्रोडाः काङ्गरूप्राणी इव स्वपुत्रं उदरस्यूते स्थापयित्वा सञ्चरन्ति।



पक्षिणः पशवः च –

टास्मानिया क्रूरप्राणिनः

आस्ट्रेलियादेशस्य आग्नेयदिशि स्थितं टास्मानियाद्वीपं अतीव प्रशान्तम्। अतः अस्मिन् परिसरे विशिष्टाः केचन प्राणिनः टास्मानियावृकाः, टास्मानियाडेविल्, टैगर् क्याट् इत्यादयः निवसन्ति।

एतेषु टास्मानियावृकः आकारेण स्थूलः। इतरवृकाणाम् अपेक्षया वामनः च। शरीरे तत्र तत्र चिह्नानि दृश्यन्ते। वृकस्त्रियः कटिं परितः स्थिते चर्मपटले शिशून् स्थापयन्ति। जन्मसमनन्तरम् एव शिशुः अत्र प्रविशति। प्रवृद्धिं यावत् तत्रैव तिष्ठति च। शैशवावस्थायां सः सर्वदा मातुः स्तनं मुखे स्थापयति। अनन्तरकाले शिशोः आवश्यकतानुगुणं काले माता एव स्तन्यं पाययति। गुहासु निवसन्तः रात्रिसञ्चारशीलाः एते वृकाः पूर्वम् आस्ट्रेलियादेशे सर्वत्र दृश्यन्ते स्म। इदानीं तु केवलं टास्मानियाद्वीपे केवलं दृश्यन्ते।

टास्मानिया डेविल् अपि एतादृशः एव पशुः, यस्य च उदरं परितः चर्मपटलं दृश्यते। शुनकस्य इव एतस्य आकारः। बृहत् शिरः, विशालं मुखं, गोलाकारौ कर्णौ, रोमपूर्णं शरीरं, यमबलं च एतस्य वैशिष्ट्यम्। कण्ठभागे पृष्ठभागे च तत्र तत्र श्वेतकालकाः अपि दृश्यन्ते। एषः रात्रौ आहारं सम्पादयति, यतः दिने सूर्यप्रकाशे द्रष्टुं न शक्नोति। अतः दिने अन्धकारपूर्णायां गुहायां बिलेषु वा एते सुप्ताः भवन्ति। स्वभावेन क्रूराः चेदपि एते सदा क्रीडन्तः सन्तोषेण तिष्ठन्ति इत्यतः केचन एतान् पालयन्ति अपि।

टास्मानियाद्वीपे आस्ट्रेलियादेशे इतरत्र च दृश्यमानः अन्यः क्रूरप्राणी टैगर् क्याट्। एते साधारणमार्जाराः इव दृश्यन्ते। दन्ताः मार्जाराणाम् इव भवन्ति चेदपि न तथा बलशालिनः। धूसरवर्णयुते एतेषां शरीरे तत्र तत्र श्वेतकालकाः दृश्यन्ते। अल्पाकारकौ कर्णौ, दीर्घं पुच्छं, रोमपूर्णं शरीरम् एतेषां वैशिष्ट्यम्।



पक्षिणः पशवः च-

अमेरिकादेशीया नाविकसंशोधनसंस्था १९७६ तमे संवत्सरे एकं विचित्रं षार्क मीनम् अगृह्णात्। अस्य मीनस्य मुखे सूच्याकारकानां दन्तानां सप्तपङ्क्तयः आसन्। ४-४२ मीटर् दैर्घ्यं, ७४८ कि.ग्रां भारः च आसीत् तस्य मीनस्य। अतः एव एतं मीनं मेगामौत्षार्क् (विशालमुखयुतः मीनः) इति नाम्ना आहूतवन्तः।



मेगा मौत् षार्क्



उलूकस्य कर्णौ

उलूकेषु केषाञ्चित् शिरसि कर्णाकारकं किञ्चित् दृश्यते। वस्तुतः एषः भागः न कर्णः, अपि तु पिच्छम्। वास्तविकौ कर्णौ तु शिरसः उभयपार्श्वे पिच्छानाम् अन्तःच गूढतया तिष्ठतः।

प्रपञ्चे एव अतिलघुः जतुकः थायलेण्ड्देशे अस्ति। एतस्य पक्षः १८० मिलिमीटर् दैर्घ्यकः। शरीरं च ३.३ मिलिमीटर् दैर्घ्यकं भवति।



लघुः जतुकः



दक्षिण-आफ्रिकादेशे भल्लूकानां काचन जातिः अस्ति येषां च नेत्रं परितः उपलोचन-सदृशं पटलं भवति। अतः एतान् 'उप-लोचनसहिताः भल्लूकाः' इति वदन्ति जनाः

विचित्रम् उपलोचम्



अपायः

'व्याघ्रभ्रमराः' इति कथ्य-मानाः समुद्रस्थाः आस्ट्रेलियन् बाक्स् जल्ली नामकाः मीनाः अत्यन्तम् अपायकारिणः। तेषां शरीरेषु सामान्यतः कोटिशः तन्तुसदृशाः केशाः राशिरूपेण तिष्ठन्ति। एते मानवान् द्वित्रेषु निमेशेषु मारयितुं समर्थाः।

कम्बलकीटस्य शरीरे सामान्यतः २००० खण्डाः भवन्ति। मानवशरीरे तु केवलं ७०० खण्डाः!



खण्डबाहुल्यम्

पक्षिणः पशवः च –

विचित्राः जलचराः

समुद्रतले स्थिताः प्रवालशिलाः विविधमीनानां वासस्थानानि। एतासां प्रवालशिलानाम् आधारेण विचित्राः विषप्राणिनः अपि जीवन्ति। एतेषु अन्यतमाः 'सी अनिमोनी' नामकाः जलचराः। एते विविधवर्णयुताः साक्षात् पुष्पाणि इव भान्ति। किन्तु बहु अपायकारिणः। एतेषां शिरसि पुष्पपरागाः इव ये चलन्ति ते वस्तुतः विषपूर्णानि श्मश्रुरोमाणि। मीनाः अन्यजलचराः च श्मश्रोः वर्णेन आकृष्टाः सन्तः समीपम् आगच्छन्ति। प्रथमस्पर्षेण एव मृताः भवन्ति। मृतम् एतं प्राणिनं अनिमोनी सुखेन गिलति। तदीयानि श्मश्रुरोमाणि सूच्याकारेण भवन्ति।विष स्रावयन्ति च।किन्तु एतत् विषं सर्वेषु परिणामं न जनयति। केषाञ्चित् प्राणिनाम् उपरि एव एतस्य परिणामः।

प्रवालशिलासु निवसतः एतस्य अनिमोनी प्राणिनः दैर्घ्यं सामान्यतः २० सें.मी.। आष्ट्रेलियादेशीयाः तु एकमीटरदीर्घाः अपि भवन्ति। एकैकः अपि अनिमोनी सामान्यतः ३० वर्षाणि यावत् प्रवालशिलासु जीवति। प्रयोगशालासु केचन अशीतिवर्षाणि अपि जीवितवन्तः। केचन प्राणिशास्त्रज्ञाः वदन्ति यत् एते प्राणिनः ३०० वर्षपर्यन्तम् अपि जीवन्ति इति। एतदनुगुणं प्रपञ्चे दीर्घजीवी जलचरः एषः एव।

एतेषां सन्तानाभिवृद्धिः द्विधा भवति। केचन तु अण्डानि प्रसूय सन्तानं वर्धयन्ति। अन्ये केचन वृक्षाणां पल्लवः इव शरीरम् उद्भिभ्य पृथक् भवन्ति।

जलान्तर्गतप्रवालशिलानां मध्ये निवसतां मीनानां कर्कटानां च शक्तीष् निवसन्तः एते आत्मानं रक्षन्ति।

प्रवालशिलासु अन्योऽपि जन्तुः विशेषतः निवसति। तस्य नाम स्टारफिश् इति। एतस्य आकारः नक्षत्रस्य इव भवति। बहु प्रकाराः भवन्ति एते। एते शक्तिसहितान् मीनान् गृहीत्वा शक्तीः बलेन निष्कास्य मीनान् खादन्ति।



पक्षिणः पशवः च –

स्काट्लेण्ड्देशीयाः वन्यमार्जाराः

स्काटलेण्ड्देशस्य उन्नताः पर्वताः, निर्मानुषानि अरण्यानि च प्राणिनाम् आहारान्वेषणे बहुधा उपकुर्वन्ति। अतः एव ब्रिटिष् द्वीपेषु अन्यत्र कुत्रापि अविद्यमानाः वन्यमार्जाराः स्काटलेण्ड्-पर्ततेषु उपत्यकासु परिदृश्यन्ते। यत्र च मानवानां पीडा न स्यात्, जलादयः यथेष्टं यत्र प्राप्येरन् तत्र एते वन्यमार्जाराः निवासम् इच्छन्ति।

पूर्वं तु बिटन्देशे सर्वत्र ये परिदृश्यन्ते स्म ते इदानीं मानवसञ्चारकारणतः उत्तरप्रान्तं प्राप्तवन्तः सन्ति।

मार्जाराणाम् अपेक्षया स्थूलाः, व्याघ्रशिशवः इव दृश्यमानाः एते वन्यमार्जाराः धूसर-वर्णयुताः। उन्नताः पादाः, रोमपूर्णं शरीरं, चतुरस्रं शिरः, पादोनमीटरपरिमितं पुच्छं- इति एषः एतेषाम् आकारः। पुच्छं परितः अङ्गुलीयकानि इव वलयानि दृश्यन्ते।

एते वृक्षकोटरेषु शिलाबिलेषु च निवसन्ति। त्वरितगत्या सञ्चरन्तः आहारं सम्पादयन्ति। रात्रौ दिने वा एकाकिनः एव सञ्चरन्ति। शशान् मूषकान् कपोतान् अन्यान् च प्राणिनः सहनया प्रतीक्षमाणाः उत्प्लुत्य आक्रम्य गृह्णन्ति। आहाराभावे कदाचित् नदीस्थान् मीनान् अपि चातुर्येण गृहीत्वा खादन्ति। वत्सरे एकवारं वसन्तकाले सन्तानम् उत्पादयन्ति।

बलयुतैः तीक्ष्णैः नखैः सहितान् एतान् पोष्यप्राणिनः इव शिक्षयितुं पालयितुं वा न शक्यते एव। शैशवावस्थायाम् एव एतान् पञ्जरे स्थापयामः चेदपि एते क्रूरस्वभावं न परित्यजन्ति। आहारदातुः हस्तम् एव नखैः छेदयन्ति एते।

मानवानां मृगयाविनोदकारणतः एतेषां सङ्ख्या दिने दिने क्षीयमाणा दृश्यते। अतः एतेषां मारणम् इदानीं निषिद्धम् अस्ति। अन्यच्च एते वन्यमार्जाराः वृक्षनाशकानां चिकोड-जातीयानां प्राणिनां सन्तानवृद्धिं नियन्त्रयन्ति।



पक्षिणः पशवः च –

मरुभूमिवासिनः प्राणिनः

यत्र रूक्षजातीयानि सस्यानि अपि कष्टेन वर्धन्ते तादृश्यां निर्जलायां मरुभूमौ अपि केचन प्राणिनः निवसन्ति इति तु आश्चर्यकरम् एव। किन्तु एतत् सत्यम्। मरुभूमौ सूर्यतापस्य पीडा असह्या। सर्वदा जलाभावः। शत्रुप्राणितः आत्मनः रक्षणार्थं रहस्यं स्थलं किमपि नास्ति। तथापि केचन प्राणिनः एतादृशं प्रकृतिविरोधं सोढुं समर्थाः सन्तः एव उत्पद्यन्ते।

गृहगोधिकासदृशाः प्राणिनः ईशान्य-आफ्रिका भागे परिदृश्यन्ते, येषां पुच्छं गोलाकारकं कण्टकाकीर्णं च भवति। प्रबलैः नखैः एते मीटर्द्वयगभीरं बिलं निर्मान्ति। शैत्यकाले रात्रौ अत्युग्रशैत्यतः आत्मानं रक्षितुम् एते एतेषु बिलेषु निवसन्ति। कण्टकमयं पुच्छं आपत्काले आयुधत्वेन परिणमन्ति। सर्पाः आक्रमणं कुर्वन्ति चेत् एते पुच्छं बिलस्य द्वारे संस्थाप्य आत्मनः सुरक्षां सम्पादयन्ति।

मरुभूमौ वसतः अन्यविधजन्तोः नाम कांगरूमूषकः इति। रात्रौ सञ्चरणशीलाः एते मूषकाः दिने बिलेषु सुप्ताः भवन्ति। किसलयविशेषान्, शुष्काणि बीजानि, कन्दमूलानि च खादन्तः एते जलं विना अपि जीवन्ति। मरुभूमिवासिनाम् इतरप्राणिनाम् इव एतेषाम् अपि श्रवणशक्तिः अतीव तीक्ष्णा। अतः उल्लूकसर्पादीनाम् आक्रमणतः पूर्वं दूरतः एव शब्दं श्रुत्वा सुरक्षिते स्थले निलीनाः भवन्ति।


सहरा मरुभूमौ दृश्यमानाः जर्बोवाजातीयाः मूषकाः अपि सामान्यतः कांगरू मूषकाः इव एव भवन्ति। किन्तु एतेषां पुच्छस्य दैर्घ्यं किञ्चिदिव अधिकम्। वेगेन उत्प्लवनं कुर्वन्तः गच्छन्ति इत्यतः कांगरूमूषकाणाम् अपेक्षया एतेषां वेगः अधिकः।





सुरङ्गनिर्माणम्!

वन्यमूषकाः एकस्यां रात्रौ ७० फूट् दैर्घ्यं यावत् सुरङ्गं निर्मातुं शक्नुवन्ति।




अति विलम्बेन पुष्प्यति

'पूयाराय् मोण्डी' नामकं विरललभ्यं सस्यम् अतिविलम्बेन पुष्प्यमाणं सस्यम् इति जगति प्रसिद्धम्। बोल्विया प्रदेशे स्थितस्य एतस्य सस्यस्य औन्नत्यं ३५ फूट्, विस्तारश्च ८ फूट्। एतत् सस्यं १५० वर्षाणाम् अनन्तरं पुष्प्यति, अनन्तरं मरणं प्राप्नोति च।



उत्प्लवनसमर्थः सर्पः

एष्याप्रदेशे निवसन् उत्प्लवनसमर्थः सर्पः सकृत् उत्प्लुत्य एकमीटर्दैर्घ्यं क्रमितुं शक्नोति।




पक्षिणः पशवः च

सर्प-दंशनेन मरणम्

सर्पदंशनेन प्रपञ्चे प्रतिवर्षं ४,००० जनाः मरणं प्राप्नुवन्ति। बर्मादेशे एतादृशस्य मरणस्य सङ्ख्या अधिका।

अक्टोपस्जलचरस्य शक्तिः!

समुद्रे निवसतः अक्टोपसृजलचरस्य शरीरे द्विशताधिकाः रक्तग्राहकाः अवयवविशेषाः (suckers) भवन्ति। एतैः अवयवैः एषः जलचरः ३१० किलोभारयुतं वस्तु उन्नेतुं शक्नोति!





महाहरिणः

अलास्काहरिणः प्रपञ्चे एव अत्युन्नतः महाहरिणः इति ख्यातः, यस्य च औन्नत्यं ७.८ फूट्मितम्, भारः च ११६ किलोग्रां मितः। एतस्य शृङ्गयोः दैर्घ्यं ७८.५ इञ्च्।